# Devistuti or Devi Tirthakshetrani

# देवीस्तुती अथवा देवी तीर्थक्षेत्राणि

## Document Information

Text title : shaktyaShTottarashatadivyasthAnIyanAmastotram or devIstutI tIrthakShetrANi

File name : devIstutItIrthakShetrANi.itx

Category : devii, shaktipITha, aShTottarashatanAma

Location : doc_devii

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Source : Matsyapurana, adhyAya 13. See corresponding nAmAvalI

Latest update : June 9, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 28, 2023

*sanskritdocuments.org*

Devistuti or Devi Tirthakshetrani

# देवीस्तुती अथवा देवी तीर्थक्षेत्राणि

(गौरी अष्टोत्तरशततीर्थनामस्तोत्रम्)
एवमुक्तोऽब्रवीद् दक्षः केषु केषु मयानघे ।
तीर्थेषु च त्वं द्रष्टव्या स्तोतव्या कैश्च नामभिः ॥ १॥

देव्युवाच -
सर्वदा सर्वभूतेषु द्रष्टव्या सर्वतो भुवि ।
सर्वलोकेषु यत् किञ्चिद् रहितं न मया विना ॥ २॥

तथापि येषु स्थानेषु द्रष्टव्या सिद्धिमीप्सुभिः ।
स्मर्तव्या भूतिकामैर्वा तानि वक्ष्यामि तत्त्वतः ॥ ३॥

वाराणस्यां विशालाक्षी नैमिषे लिङ्गधारिणी ।
प्रयागे ललिता देवी कामाक्षी गन्धमादने ॥ ४॥

मानसे कुमुदा नाम विश्वकाया तथाम्बरे ।
गोमन्ते गोमती नाम मन्दरे कामचारिणी ॥ ५॥

मदोत्कटा चैत्ररथे जयन्ती हस्तिनापुरे ।
कान्यकुब्जे तथा गौरी रम्भा मलयपर्वते ॥ ६॥

एकाम्रके कीर्तिमती विश्वा विश्वेश्वरे विदुः ।
पुष्करे पुरुहूतेति केदारे मार्गदायिनी ॥ ७॥

नन्दा हिमवतः पृष्ठे गोकर्णे भद्रकर्णिका ।
स्थाण्वीश्वरे भवानी तु बिल्वके बिल्वपत्रिका ॥ ८॥

श्रीशैले माधवी नाम भद्रा भद्रेश्वरे तथा ।
जया वराहशैले तु कमला कमलालये ॥ ९॥

रुद्रकोट्यां च रुद्राणी काली कालञ्जरे गिरौ ।
महालिङ्गे तु कपिला मर्कोटे मुकुटेश्वरी ॥ १०॥

शालग्रामे महादेवी शिवलिङ्गे जलप्रिया ।
मायापुर्यां कुमारी तु सन्ताने ललिता तथा ॥ ११॥

उत्पलाक्षी सहस्राक्षे कमलाक्षे महोत्पला ।
गङ्गायां मङ्गला नाम विमला पुरुषोत्तमे ॥ १२॥

विपाशायाममोघाक्षी पाटला पुण्ड्रवर्धने ।
नारायणी सुपार्श्वे तु विकूटे भद्रसुन्दरी ॥ १३॥

विपुले विपुला नाम कल्याणी मलयाचले ।
कोटवी कोटितीर्थे तु सुगन्धा माधवे वने ॥ १४॥

गोदाश्रमे त्रिसन्ध्या तु गङ्गाद्वारे रतिप्रिया ।
शिवकुण्डे शिवानन्दा नन्दिनी देविकातटे ॥ १५॥

रुक्मिणी द्वारवत्यां तु राधा वृन्दावने वने ।
देवकी मथुरायां तु पाताले परमेश्वरी ॥ १६॥

चित्रकूटे तथा सीता विन्ध्ये विन्ध्यनिवासिनी । var विन्ध्याधिवासिनी
सह्याद्रावेकवीरा तु हरिश्चन्द्रे तु चन्द्रिका ॥ १७॥

रमणा रामतीर्थे तु यमुनायां मृगावती ।
करवीरे महालक्ष्मीरुमादेवी विनायके ॥ १८॥

अरोगा वैद्यनाथे तु महाकाले महेश्वरी ।
अभयेत्युष्णतीर्थेषु चामृता विन्ध्यकन्दरे ॥ १९॥

माण्डव्ये माण्डवी नाम स्वाहा माहेश्वरे पुरे ।
छागलाण्डे प्रचण्डा तु चण्डिका मकरन्दके ॥ २०॥

सोमेश्वरे वरारोहा प्रभासे पुष्करावती ।
देवमाता सरस्वत्या पारावारतटे मता ॥ २१॥

महालये महाभागा पयोष्ण्यां पिङ्गलेश्वरी ।
सिंहिका  कृतशौचे तु कार्तिकेये यशस्करी ॥ २२॥

उत्पलावर्तके लोला सुभद्रा शोणसङ्गमे ।
माता सिद्धपुरे लक्ष्मीरङ्गना भरताश्रमे ॥ २३॥

जालन्धरे विश्वमुखी तारा किष्किन्धपर्वते ।
देवदारुवने पुष्टिर्मेधा काश्मीरमण्डले ॥ २४॥

भीमा देवी हिमाद्रौ तु पुष्टिर्विश्वेश्वरे तथा ।
कपालमोचने शुद्धिर्माता कायावरोहणे ॥ २५॥

शङ्खोद्धारे ध्वनिर्नाम धृतिः पिण्डारके तथा ।
काला तु चन्द्रभागायामच्छोदे शिवकारिणी ॥ २६॥

वेणायाममृता नाम बदर्यामुर्वशी तथा ।
औषधी चोत्तरकुरौ कुशद्वीपे कुशोदका ॥ २७॥

मन्मथा हेमकूटे तु मुकुटे सत्यवादिनी ।
अश्वत्थे वन्दनीया तु निधिर्वैश्रवणालये ॥ २८॥

गायत्री वेदवदने पार्वती शिवसन्निधौ ।
देवलोके तथेन्द्राणी ब्रह्मास्येषु सरस्वती ॥ २९॥

सूर्यबिम्बे प्रभा नाम मातृणां वैष्णवी मता ।
अरुन्धती सतीनां तु रामसु च तिलोत्तमा ॥ ३०॥

चित्ते ब्रह्मकला नाम शक्तिः सर्वशरीरिणाम् ।
एतदुद्देशतः प्रोक्तं नामाष्टशतमुत्तमम् ॥ ३१॥

अष्टोत्तरं च तीर्थानां शतमेतदुदाहृतम् ।
यः स्मरेच्छृणुयाद् वापि सर्वपापैः प्रमुच्यते ॥ ३२॥

एषु तीर्थेषु यः कृत्वा स्नानं पश्यति मां नरः ।
सर्वपापविनिर्मुक्तः कल्पं शिवपुरे वसेत् ॥ ३३॥

यस्तु मत्परमं कालं करोत्येतेषु मानवः ।
स भित्त्वा ब्रह्मसदनं पदमभ्येति शाङ्करम् ॥ ३४॥

नाम्नामष्टशतं यस्तु श्रावयेच्छिवसन्निधौ ।
तृतीयायामथाष्टम्यां बहुपुत्रो भवेन्नरः ॥ ३५॥

गोदाने श्राद्धदाने वा अन्यहनि वा बुधः ।
देवार्चनविधौ विद्वान् पठन् ब्रह्माधिगच्छति ॥ ३६॥

इति मत्स्यपुराणे त्रयोदशोऽध्याये देवीस्तुतिः समाप्ता ।

श्रीशाक्त्यष्टोत्तरशतदिव्यस्थानीयनामस्तोत्रम्
गौरी अष्टोत्तरशततीर्थनामस्तोत्रम्

मत्स्यपुराण १३/२४

Encoded and posted by Gopal Upadhyay gopal.j.upadhyay at gmail.com

*Devistuti or Devi Tirthakshetrani*

pdf was typeset on October 28, 2023

Please send corrections to *sanskrit@cheerful.com*